# Shri Bala Panchangam

# શ્રીબાલાપઞ્ચાઙ્ગમ્

## Document Information

Text title : Shri Bala Panchangam

File name : bAlApanchAngam.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH, Rudrayamala

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાપઞ્ચાઙ્ગમ્

શ્રીભૈરવ ઉવાચ-
અધુના દેવિ વક્ષ્યામિ રહસ્યં સ્તોત્રરૂપકમ્ ।
યેન સાધક ઈશાનિ સાક્ષાત્ શ્રીભૈરવાયતે ॥ ૧॥

અઙ્ગં ત્રિપુરસુન્દર્યાઃ પઞ્ચમાખ્યાં મહેશ્વરિ ।
પઞ્ચમીરૂપમાનન્દરૂપમાનન્દવર્ધનમ્ ॥ ૨॥

તત્ત્વં શ્રીત્રિપુરાદેવ્યાઃ શ્યામાયાશ્ચ રહસ્યકમ્ ।
સ્તોત્રરાજઃ પરાદેવ્યાઃ પરમાનન્દકારણમ્ ॥ ૩॥

સ્તોત્રસ્યાસ્ય મહાદેવિ ઋષિઃ પ્રોક્તઃ સદાશિવઃ ।
પઙ્ક્તિશ્છન્દઃ સમાખ્યાતં દેવતા ત્રિપુરા સ્મૃતા ॥ ૪॥

ધર્માર્થકામમોક્ષાર્થે વિનિયોગઃ પ્રકીર્તિતઃ ।

ધ્યાનમ્-
સૂર્યકોટિસમાનાભાં ચતુર્બાહું ત્રિલોચનામ્ ।
રક્તપદ્મસમાસીનાં રક્તવસ્ત્રાદ્યલઙ્કૃતામ્ ॥

પુસ્તકં ચાક્ષમાલાં ચ વરં ચાભયમેવચ ।
દધતીં ચ હૃદમ્ભોજે શ્રીબાલાત્રિપુરાં ભજે ॥

વાગ્ભવં ભવમહાર્ણવપ્રોક્તં યો જપેન્મનસિ માનવતીનામ્ ।
કામેકેલિષુ ભવેત્સ સાધકઃ કામદેવ ઇવ વૈરિબાધકઃ ॥ ૧॥

મદનં મદનાક્ષરં જપેદ્યો વદનાચ્છાદનબદ્ધમૌનમુદ્રઃ ।
સ ભાવેદ્ભવસાગરૈકપોતો ભવરૂપો ભુવનત્રયેશ્વરઃ સ્યાત્ ॥ ૨॥

શક્તિબીજમનઘં સુધાકરં સાધકો યદિ જપેત્ હૃદિ ભક્ત્યા ।
તસ્ય દેવવનિતા ચરણાબ્જૌ રઞ્જયન્તિ મુકુટૈર્મણિયુક્તૈઃ ॥ ૩॥

બિન્દુત્રિકોણવસુનાગદલાઢ્ય વેદ

ગેહાન્વિતે પરમયન્ત્રવરે નિષણ્ણામ્ ।
ધ્યાયન્તિ યે પરિકરેણ સમન્વિતાં ત્વાં
સંપ્રાપ્નુવન્તિ તવ દેવિ પરં પદં તત્ ॥ ૪॥

ઇતીદં પરમં ગુહ્યમઙ્ગભૂતં હિ પઞ્ચમમ્ ।
દેવિ ત્રિપુરસુન્દર્યાઃ શ્રીબાલાયાઃ સ્તવોત્તમમ્ ॥ ૫॥

રહસ્યમેતદખિલં ન કસ્ય કથિતં મયા ।
તવ ભક્ત્યા મયા ખ્યાતં ન પ્રકાશ્યં મહેશ્વરિ ॥ ૬॥

ઇદં પઞ્ચાઙ્ગમનિશં બાલાયાઃ સારમુત્તમમ્ ।
ગોપ્યં ગુહ્યતરં ગુહ્યં ગોપનીયં પ્રયત્નતઃ ॥ ૭॥

ઇતિ શ્રીરુદ્રયામલે શ્રીબાલાપઞ્ચાઙ્ગં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Panchangam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*